दिनाङ्क :- 18.03.2026

प्रात: - 06:55

## प्रधानमन्त्री-यू.ए.ई. राष्ट्रपतिना:

प्रधानमन्त्रिणा नरेन्द्रमोदिना यू.ए.ई. अध्यक्षेन शेख मोहम्मद बिन जायद अल नह्यान इत्यमुना सह दूरभाषमध्यमेन वार्तालापः कृतः। वार्तालापावधौ द्वयोः नेतयोः मध्ये पश्चिम-एशिया-देशस्य वर्तमान-स्थित्यां चर्चाऽभवत्। श्रीमोदी, सामाजिक-पटले लिखितवान् यत्, यू. ए. ई. देशस्य उपरि कृतान् आक्रमणान् भारतेन दृढतया निन्दितं, येषु निर्दोष-जनाः मृताः, नागरिक-मूलसौकर्याणां क्षतिः चाभवत्। उभौ नेतारौ होर्मुज़्-जलसंधिना सुरक्षितं स्वतन्त्रं च नौचालनं सुनिश्चितस्य महत्त्वम् अपि प्रतिपादितवन्तौ।

## पश्चिमेशिया- सङ्घर्षः

पश्चिमेशियायां सङ्घर्षः इतोपि तीव्रतरः अभवत्, ईरान्-देशस्य राष्ट्रिय-सुरक्षा-परिषदि रात्रौ इस्रैल-आक्रमणे तस्य सुरक्षा-प्रमुखस्य अली-लारिजानी इत्यस्य मृत्युः अभवत्। वर्तमानयुद्धे इरान्-देशस्य अनुभवसम्पन्नानां प्रभावशालिनां च नीतिनिर्मातृषु अन्यतमस्य अली लारीजानी इत्यस्य मृत्युः तेहरानस्य कृते महताघातः अस्ति। सः स्वपुत्रेण मोर्तेज़ा लारिजानी इत्यनेन, कार्यालयस्य प्रमुखेन अलीरेज़ा बयात् इत्यनेन, अन्यैः अङ्गरक्षकैः च सह मारितः। पूर्वं, इरान्-देशस्य मिजान्-न्यूस्-एजेन्सी, इत्यनेन रिवोल्यूशनरी-गार्ड् इत्यस्य बासिज-बलस्य प्रमुखस्य जनरल्-गुलाम-रेज़ा-सुलेमानी इत्यस्य मृत्योः पुष्टि-कृता। सम्बद्धे प्रकरणे, अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्प् इत्येषः उक्तवान् यत् अधिकांशाः नाटो-मित्र-देशा: इरान्-देशस्य विरुद्धं अमेरिकादेशस्य सैन्यकार्यक्रमे सहयोगं कर्तुं निराकृतवन्तः, सङ्घटनस्य निन्दां कुर्वन् अपि च वाशिङ्गटनं विदेशीयसमर्थनस्य आवश्यकता नास्ति इति दृढीकृतवान्।

लोकसभा-आज

लोकसभायां अद्य षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्रतम वर्षयोः कृते कृषि-कृषक-कल्याण-मन्त्रालयस्य नियन्त्रणे अनुदान-याचिकायां चर्चा मतदानं च भविष्यति। गृहमन्त्रालयस्य, विदेशमन्त्रालयस्य, ऊर्जामन्त्रालयस्य च नियन्त्रणे अनुदान-याचिकायाम् अपि सभायां चर्चा, मतदानं च भविष्यति। गतरात्रौ लोकसभायां रेलमन्त्रालयस्य नियन्त्रणे अनुदानस्य आग्रहे चर्चायाः प्रत्युत्तरे रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् मोदी-प्रशासनेन गतदशके रेलमार्गे महती-परिवर्तनं कृतम्, विभागस्य सर्वेषु क्षेत्रेषु च कार्यम् अकरोत्।

अत्रान्तरे, संसदा विनियोग-विधेयकम् विंशति षड्विंशति स्वीकृतम्, राज्यसभया ह्यः चर्चायाः अनन्तरं निम्नसदनम् प्रत्यर्पितम्। लोकसभायां पूर्वमेव तस्य अनुमोदनं जातम्।

कतर-भारतीय दूतावास

दोहायां भारतीय-दूतावासेन उक्तं यत् कतर्-एयर्वेस संस्थया ह्यः भारतं प्रति पञ्चविमानयानानि प्रचालितानि, येन कतर्-देशे वर्तमानस्य वायुप्रदेशस्य प्रतिबन्धस्य मध्ये षोडश-शत-तोप्यधिकाः भारतीयाः नागरिकाः आसन्। दूतावासः अवदत् यत् विमान-संस्थया अद्यारभ्य सम्पर्कस्य विस्तारस्य योजनायाः घोषणाम् अपि कृता, यस्मिन् नव भारतीय-गन्तव्यस्थानानि प्रति विमानयानानि नियतानि सन्ति। दूतावासेन प्रसारितस्य आदेशानुसारं कतर्-देशस्य वायुप्रदेशः बहुधा निरुद्धः एव अस्ति, सम्प्रति केवलं केचन विमान-यानानां परिचालनस्य अनुमतिः अस्ति।

श्रीलंका राष्ट्रपति –अ ्थव्यवस्था

श्रीलङ्कादेशस्य राष्ट्रपतिः अनुरा कुमार दिसानायके इत्येषः द्वीपस्य अर्थव्यवस्थां रक्षणाय, ऊर्जा-सुरक्षां सुनिश्चेतुं च आपत्कालीन-उपायानाम् शृङ्खलाम् अघोषयत्। मध्यपूर्वदेशे प्रचलितः द्वन्द्वः वैश्विक-इन्धन-आपूर्तिश्रृंखलाम् बाधयति, आवश्यक-वस्तूनां सेवायाः च विषये आन्तरिक-

समाह्वानं च वर्धयति। एकस्मिन् विशिष्ट-मीडिया-सन्देशे, श्री. दिसानायके द्वन्द्वस्य कठोर-तटस्थतायाः नीतिं पुनः दृढीकृतवान्।